DIAMOND MOUNTAIN DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

ADVANCED SANSKRIT
PART 3

# WEEK TWO

DIAMOND MOUNTAIN UNIVERSITY

Advanced Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Spring Term, Class Schedule

**WEEK ONE: Thursday, May 3, 2007 1:00 – 4:00 PM**

A. Quiz covering verbal adjectives and nouns in Whitney
B. Review of homework from break between terms (Arya Nagarjuna's मूलमध्यमककारिका, chapters 13-14; see text below)

**HOMEWORK:**

1. Study Chapter XIV in Whitney ("Derivatives or Secondary Conjugation"), concentrating on section III, "Desiderative" (pp. 372-378, #1026 - #1040)

2. Finish translation of Chapter 15 of Arya Nagarjuna's मूलमध्यमककारिका, (see text below) and continue on with a translation of Chapter 16 (below). For both chapters, provide a word by word English translation. In addition, identify for each word what grammatical part of speech it is. If it's a noun, identify its gender, case, and number (e.g., सद्भूतः, masculine, nominative, singular). If it's a verb, identify its verbal root, tense, voice, person and number (e.g. करोति, third person singular, present parasmaipadi, active, from the root कृ ).

# संस्कारपरीक्षा नाम त्रयोदशमं प्रकरणं

तन्मृषा मोषधर्म यद्भगवानित्यभाषत।
सर्वे च मोषधर्माणः संस्कारास्तेन ते मृषा॥ १

तन्मृषा मोषधर्म यद्यदि किं तत्र मुष्यते।
एतत्तूक्तं भगवता शून्यतापरिदीपकं॥ २

भावानां निःस्वभावत्वमन्यथाभावदर्शनात्।
अस्वभावो भावो नास्ति भावानां शून्यता यतः॥ ३

कस्य स्यादन्यथाभावः स्वभावश्चेन्न विद्यते।
कस्य स्यादन्यथाभावः स्वभावो यदि विद्यते॥ ४

तस्यैव नान्यथाभावो नाप्यन्यस्यैव युज्यते।
युवा न जीर्यते यस्माद्यस्माज्जीर्णो न जीर्यते॥ ५

तस्य चेदन्यथाभावः क्षीरमेव भवेद्दधि।
क्षीरादन्यस्य कस्य चिद्दधिभावो भविष्यति॥ ६

यद्यशून्यं भवेत्किं चित्स्याच्छून्यमिति किं चन।

न किं चिदस्त्यशून्यं च कुतः शून्यं भविष्यति॥ ७

शून्यता सर्वदृष्टीनां प्रोक्ता निःसरणं जिनैः।

येषां तु शून्यतादृष्टिस्तानसाध्यान् बभाषिरे॥ ८

## संसर्गपरीक्षा नाम चतुर्दशमं प्रकरणं

द्रष्टव्यं दर्शनं द्रष्टा त्रीण्येतानि द्विशो द्विशः।

सर्वशश्च न संसर्गमन्योन्येन व्रजन्त्युत॥ १

एवं रागश्च रक्तश्च रञ्जनीयं च दृश्यतां।

त्रैधेन शेषाः क्लेशाश्च शेषाण्यायतनानि च॥ २

अन्येनान्यस्य संसर्गस्तच्चान्यत्वं न विद्यते।

द्रष्टव्यप्रभृतीनां यन्न संसर्गं व्रजन्त्यतः॥ ३

न च केवलमन्यत्वं द्रष्टव्यादेर्न विद्यते।

कस्य चित्केन चित्सार्धं नान्यत्वमुपपद्यते॥ ४

अन्यदन्यत्प्रतीत्यान्यन्नान्यदृते ऽन्यतः।
यत्प्रतीत्य च यत्तस्मात्तदन्यन्नोपपद्यते॥ ५

यद्यन्यदन्यदन्यस्मादन्यस्मादप्यृते भवेत्।
तदन्यदन्यदन्यस्मादृते नास्ति च नास्त्यतः॥ ६

नान्यस्मिन् विद्यते ऽन्यत्वमनन्यस्मिन् न विद्यते।
अविद्यमाने चान्यत्वे नास्त्यन्यद्वा तदेव वा॥ ७

न तेन तस्य संसर्गो नान्येनान्यस्य युज्यते।
संसृज्यमानं संसृष्टं संस्रष्टा च न विद्यते॥ ८

## स्वभावपरीक्षा नाम पञ्चदशमं प्रकरणं

न संभवः स्वभावस्य युक्तः प्रत्ययहेतुभिः।
हेतुप्रत्ययसंभूतः स्वभावः कृतको भवेत्॥ १

स्वभावः कृतको नाम भविष्यति पुनः कथं।
अकृत्रिमः स्वभावो हि निरपेक्षः परत्र च॥ २

कुतः स्वभावस्याभावे परभावो भविष्यति।
स्वभावः परभावस्य परभावो हि कथ्यते॥ ३

स्वभावपरभावाभ्यामृते भावः कुतः पुनः।
स्वभावे परभावे वा सति भावो हि सिध्यति॥ ४

भावस्य चेदप्रसिद्धिरभावो नैव सिध्यति।
भावस्य ह्यन्यथाभावमभावं ब्रुवते जनाः॥ ५

स्वभावं परभावं च भावं चाभावमेव च।
ये पश्यन्ति न पश्यन्ति ते तत्त्वं बुद्धशासने॥ ६

कात्यायनाववादे चास्तीति नास्तीति चोभयं।
प्रतिषिद्धं भगवता भावाभावविभाविना॥ ७

यद्यस्तित्वं प्रकृत्या स्यान्न भवेदस्य नास्तिता।
प्रकृतेरन्यथाभावो न हि जातूपपद्यते॥ ८

प्रकृतौ कस्य चासत्यामन्यथात्वं भविष्यति।

प्रकृतौ कस्य च सत्यामन्तथात्वं भविष्यति॥ ९

अस्तीति शाश्वतग्राहो नास्तीत्युच्छेददर्शनं।

तस्मादस्तित्वनास्तित्वे नाश्रीयेत विचक्षणः॥ १०

अस्ति यद्धि स्वभावेन न तन्नास्तीति शाश्वतं।

नास्तीदानीमभूत्पूर्वमित्युच्छेदः प्रसज्यते॥ ११

बन्धनमोक्षपरीक्षा नाम षोडशमं प्रकरणं

संस्काराः संसरन्ति चेन्न नित्याः संसरन्ति ते।

संसरन्ति च नानित्याः सत्त्वे ऽप्येष समः क्रमः॥ १

पुद्गलः संसरति चेत्स्कन्धायतनधातुषु।

पञ्चधा मृग्यमाणो ऽसौ नास्ति कः संसरिष्यति॥ २

उपादानादुपादानं संसरन् विभवो भवेत्।

विभवश्चानुपादानः कः स किं संसरिष्यति॥ ३

संस्काराणां न निर्वाणं कथं चिदुपपद्यते।
सत्त्वस्यापि न निर्वाणं कथं चिदुपपद्यते॥ ४

न बध्यन्ते न मुच्यन्त उदयव्ययधर्मिणः।
संस्काराः पूर्ववत्सत्त्वो बध्यते न न मुच्यते॥ ५

बन्धनं चेदुपादानं सोपादानो न बध्यते।
बध्यते नानुपादानः किमवस्थो ऽथ बध्यते॥ ६

बध्नीयाद्बन्धनं कामं बन्ध्यात्पूर्वं भवेद्यदि।
न चास्ति तत् शेसमुक्तं गम्यमानगतागतैः॥ ७

बद्धो न मुच्यते तावदबद्धो नैव मुच्यते।
स्यातां बद्धे मुच्यमाने युगपद्बन्धमोक्षणे॥ ८

निर्वास्याम्यनुपादानो निर्वाणं मे भविष्यति।
इति येशां ग्रहस्तेषामुपादानमहाग्रहः॥ ९

न निर्वाणसमारोपो न संसारापकर्षणं।
यत्र कस्तत्र संसारो निर्वाणं किं विकल्प्यते॥ १०